# केन्द्रीयसंस्कृतविश्वविद्यालयः
## ज्योतिषविभागः
## एकलव्यपरिसरः अगरतला, त्रिपुरा।

**विषयः–जैमिनिसूत्रम्**
**कक्षा–शास्त्रीतृतीयवर्षम्**
**षष्ठपत्रम्**

**डॉ.ब्रह्मानन्दमिश्रः**
**सहायकाचार्यः ज्योतिषविभागः**
**एकलव्यपरिसरः, अगरतला।**

## निबन्धात्मकप्रश्नाः

**प्रश्न–01. दृष्टिसाधनं प्रतिपादयत।**

**उत्तरम्–** ''जैमिनिसूत्रम्'' इति ग्रन्थस्य आदौ दृष्टिसाधनस्य विषये विलक्षणविचारः सम्प्राप्यते। सामान्यतः जातकग्रन्थेषु ग्रहाणामेव दृष्टिविचारः समुपलभ्यते परन्तु ग्रन्थेऽस्मिन् ऋक्षाणां दृष्टिविषये चर्चा वर्तते। जैमिनिसूत्रग्रन्थे दृष्टिसाधनं द्विविधमस्ति–

(क) राशीनां दृष्टिविचारः, (ख) ग्रहाणां दृष्टिविचारश्च

**राशीनां दृष्टिविचारः–**

जैमिनिसूत्रे राशीनां चरादिसंज्ञानुसारेण तेषां दृष्टिस्थानानि निश्चितानि सन्ति। अस्मिन्विषये तत्र सूत्ररूपे लिखितमस्ति यत्–

''**अभिपश्यन्त्यृक्षाणि पार्श्वभे च।**''

अभि इत्युक्ते स्वस्य सम्मुखं, पार्श्वभे अर्थात् पार्श्ववर्ति–ऋक्षाणि। ऋक्षस्य सामान्यार्थः नक्षत्रं भवति किन्त्वत्र ऋक्षशब्दस्य तात्पर्यं राशि इति स्वीक्रियते। अनेन सूत्रस्य अर्थो जातः ऋक्षाणि राशयोऽभि स्वसम्मुखस्थराशिं पार्श्वभे पार्श्वस्थराशिं च पश्यन्ति। परन्तु सूत्रस्य तात्पर्यं स्पष्टं न जातमतः अधोलिखितकारिका अस्य सूत्रस्यार्थावगमे सहायिका अस्ति –

**चरं धनं विना स्थाणुं स्थिरमन्त्यं विना चरम्।**
**युग्मं स्वेन विना युग्मं पश्यन्तीत्ययमागमः।।**

अर्थात् चरराशिः धनस्थानस्थितराशिं विहाय सर्वान् स्थिरराशीन् विलोकयति। स्थिरराशिः व्ययभावस्थस्य (द्वादशस्थानस्थितस्य) चरराशिं त्यक्त्वा सर्वान् चरराशीन् पश्यति। द्विस्वभावराशिः स्वस्थानं विहाय सर्वान् द्विस्भावराशीन् विलोकयति।

प्रसंगेऽस्मिन् अन्यमतमपि प्रस्तूयते–

केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः

**उभयानुभयः पश्चेच्चरान् स्थास्नुः स्थिरांश्चरः।**

**समीपसंस्थितं राशिं त्यक्त्वा त्रींस्त्रीन् यथाक्रमम्।।**

अर्थात् यथाक्रमं समीपस्थितं राशिं विहाय द्विस्वभावराशिः त्रीन् द्विस्वभावराशीन् पश्येत्, स्थिरराशिः त्रीन् चरराशीन् विलोकयेत्, तथा च चरराशिः त्रीन् स्थिरराशीन् पश्येत्।

सर्वप्रथमं चरादिसंज्ञकराशयः प्रदर्श्यते –

**चरराशयः–** मेषः कर्कः तुला मकरश्च ।

**स्थिरराशयः–** वृषः सिंहः वृश्चिकः कुम्भश्च।

**द्विस्वभावराशयः–** मिथुनः कन्या धनुः मीनश्च।

**चरराशिषु पार्श्वसम्मुखराशयः –** ततः चरस्य पार्श्ववर्तिराशी स्वस्थानात् पंचमैकादशस्थराशी भवतः। तस्य सम्मुखस्थराशिः तस्मादष्टमस्थराशिः स्यात्। तद्यथा –

(1) मेषस्य पार्श्ववर्तिराशी – सिंहकुम्भौ, सम्मुखराशिः – वृश्चिकः।

(2) कर्कस्य पार्श्ववर्तिराशी – वृश्चिकवृषौ, सम्मुखस्थराशिः – कुम्भः।

(3) तुलायाः पार्श्ववर्तिराशी – कुम्भसिंहौ, सम्मुखस्थराशिः – वृषभः।

(4) मकरस्य पार्श्ववर्तिराशी –वृषवृश्चिकौ, सम्मुखराशिः – सिंहः।

**स्थिरराशिषु पार्श्वसम्मुखराशयः –**

स्थिरस्य पार्श्ववर्तिराशी तस्मात् तृतीयनवमस्थराशी भवतः। तस्य सम्मुखस्थराशिः तस्मात्षष्ठस्थराशिः स्यात्। तद्यथा –

(1) वृषस्य पार्श्ववर्तिराशी – कर्कमकरौ, सम्मुखराशिः – तुला।

(2) सिहंस्य पार्श्ववर्तिराशी – तुलामेषौ, सम्मुखराशिः – मकरः।

(3) वृश्चिकस्य पार्श्ववर्तिराशी – मकरकर्कौ, सम्मुखराशिः – मेषः।

(4) कुम्भस्य पार्श्ववर्तिराशी – मेषतुले, सम्मुखराशिः – कर्कः।

**द्विस्वभावराशिषु पार्श्वसम्मुखराशयः –**

द्विस्वभावस्य पार्श्ववर्तिराशी चतुर्थदशमस्थराशी भवतः। तस्य सम्मुखस्थराशिः तस्मात्सप्तमस्थराशिः स्यात्। तद्यथा –

(1) मिथुनस्य पार्श्ववर्तिराशी – कन्यामीनराशी, सम्मुखराशिः – धनुः।

(2) कन्यायाः पार्श्ववर्तिराशी – मिथुनधनुराशी, सम्मुखराशिः – मीनः।

(3) धन्वो. पार्श्ववर्तिराशी – मीनकन्याराशी, सम्मुखराशिः – मिथुनः।

(4) मीनस्य पार्श्ववर्तिराशी – मिथुनधनुराशी, सम्मुखराशिः – कन्या।

अथ सारिणीद्वारा राशिदृष्टिविचारः प्रदर्श्यते –

| **द्रष्टा राशिः** | **प्रथमपार्श्वदृष्टिराशिः** | **सम्मुखदृष्टिराशिः** | **द्वितीयपार्श्वदृष्टिराशिः** |
|---|---|---|---|
| मेषः | सिंहः | वृश्चिकः | कुम्भः |
| वृषः | कर्कः | तुला | मकरः |
| मिथुनः | कन्या | धनुः | मीनः |
| कर्कः | वृश्चिकः | कुम्भः | वृषः |
| सिंहः | तुला | मकरः | मेषः |
| कन्या | मिथुनः | मीनः | धनुः |
| तुला | कुम्भः | वृषः | सिंहः |
| वृश्चिकः | मकरः | मेषः | कर्कः |
| धनुः | मीनः | मिथुनः | कन्या |
| मकरः | वृषः | सिंहः | वृश्चिकः |
| कुम्भः | मेषः | कर्कः | तुला |
| मीनः | मिथुनः | कन्या | धनुः |

केन्द्रीयसंस्कृतविश्वविद्यालयः

**प्रश्न–02. सोदाहरणं अर्गलाविचारं विशदयत।**

**उत्तरम्–** अर्गला नाम शृंखलाबन्धनम्। यथा कपाटे अर्गला कपाटबन्धनं करोति तथैव अर्गलास्थाने स्थितो ग्रहो विचाराश्रयिस्थानस्य फलस्य शृंखलाबन्धनं करोति। परन्तु द्रष्टुः न करोति। कथयितुं शक्यते तद्भावफलस्यैव निरोधं विधास्यति। इयमर्गला अपि शुभाशुभभेदेन द्विविधा भवति। यस्याः अर्गलायाः प्रतिबन्धकस्थानानि न सन्ति सा तु शुभार्गला भवति। अस्या एव पर्यायः निराभासार्गला शुद्धार्गला वा कथितः अस्ति। एवमेव प्रतिबन्धकस्थानयुक्ता अर्गला अशुभार्गला अस्ति, या पापार्गला विपरीतार्गला साभासार्गला वापि कथ्यते।

अत्र ध्यातव्यं यत् जैमिनिसूत्रे सूर्य–भौम–शनि–क्षीणचन्द्र–राहवः पापग्रहाः बुध–गुरु–शुक्र–शुक्लपूर्णचन्द्राश्च शुभग्रहाः स्वीकरणीयाः। यद्यपि तत्र सूत्रेषु कुत्रापि स्पष्टरूपेण नोक्तं तथापि वृद्धकारिकायाः मतानुसारेण –

**अर्कारमन्दफणिनः क्रमात्क्रूरा यथाश्रयम्।**
**चन्द्रोऽपि क्रूर एवात्र क्वचिदंगारकाश्रये।।**

अर्थात् केचन मतानुसारेण तु भौमराश्याश्रयः चन्द्र अर्थात् मेषवृश्चिकराशयोः संस्थितः चन्द्रः पापग्रहो भवति, अन्यराशिषु संस्थितः शुभो भवेदिति। किन्तु बाहुल्येन क्षीणचन्द्रः कृष्णपंचमीतः शुक्लपंचमीपर्यन्तं (मतान्तरेण कृष्णाष्टमीतः शुक्लाष्टमीपर्यन्तमथवा कृष्णैकादशीतः शुक्लैकादशीं यावत्) स्वीक्रियते। एवमेव पूर्णचन्द्रः शुक्लपंचमीतः कृष्णपंचमीपर्यन्तं (मतान्तरेण शुक्लाष्टमीतः कृष्णाष्टमीपर्यन्तमथवा शुक्लैकादशीतः कृष्णैकादशीं यावत्) स्वीक्रियते।

**2.2.1 भावस्थानज्ञानपद्धतिः–**

जैमिनिसूत्रस्य एका विशेषतेयं वर्तते यत् सूत्रेषु भावस्थानज्ञानं वर्णाक्षरैः क्रियते। तत्प्रकारस्तु कटपयादिवर्गः अस्ति। अस्मिन् सन्दर्भे वृद्धकारिकायां कथितमस्ति यथा–

**कटपयवर्गभवैरिह पिण्डान्त्यैरक्षरैरंकाः।**
**नमे च शून्ये ज्ञेये तथा स्वरे केवले कथितम्।।**

अर्थात् कादि नव, टादि नव, पादि पंच, याद्याष्टौ च एते चत्वारो वर्गाः अंकानां ज्ञानाय सन्ति। यथा कवर्णतः झवर्णपर्यन्तं क्रमशः नवांकाः, पुनः टवर्णतः धवर्णपर्यन्तं क्रमशः नवांकाः ज्ञेयाः। पवर्णतः मवर्णपर्यन्तं क्रमशः पंचांकाः अवधेयाः, यवर्णतः हवर्णपर्यन्तं क्रमशः अष्टांकान् जानीयात् अत्र नञवर्णाभ्यां शून्यसमे ज्ञेये। यथा सारिण्यां न्यस्तमस्ति –

**– कटपयादि–संख्या–बोधक चक्रम् –**

| **स्वरः = अंकः** | **वर्णः = अंकः** | **वर्णः = अंकः** | **वर्णः = अंकः** | **वर्णः = अंकः** |
|---|---|---|---|---|
| अ = 0 | क = 1 | ट = 1 | प = 1 | य = 1 |
| इ = 0 | ख = 2 | ठ = 2 | फ = 2 | र = 2 |
| उ = 0 | ग = 3 | ड = 3 | ब = 3 | ल = 3 |
| ऋ = 0 | घ = 4 | ढ = 4 | भ = 4 | व = 4 |
| लृ = 0 | ङ = 5 | ण = 5 | म = 5 | श = 5 |
| ए = 0 | च = 6 | त = 6 | – | ष = 6 |
| ऐ = 0 | छ = 7 | थ = 7 | – | स = 7 |
| ओ = 0 | ज = 8 | द = 8 | – | ह = 8 |
| औ = 0 | झ = 9 | ध = 9 | – | – |
| – | ञ = 0 | न = 0 | – | – |

आभिर्वर्णाक्षरसंख्याभिरंकाना वामतो गतिरीत्यानुसारेण भावस्थानस्य बोधं भवति। यथोदाहरणानि–

**दारशब्दे** उपर्युक्तसारिण्यनुसारेण 'द' वर्णेन 8 इति संख्या, 'र' वर्णेन 2 इति संख्या ज्ञायते। अनयोः स्थापनया 82 इति संख्या दृश्यते। ततः अंकानां वामतो गतिः इति नियमेन 28 अष्टाविंशतिर्भावस्य संख्या भवति। सा तु भावसंख्या द्वादशेन तष्टितं 28÷12 लब्धिः 2, शेषश्च 4 इति प्राप्यते। अत्र शेषः 4 इयं संख्या राशेर्भावस्य वा बोधकसंख्या जाता तस्मात् कारणात् दारशब्देन चतुर्थभावस्थानम् अत्र ज्ञायते।

एवमेव **भाग्यशब्दे** सारिण्यनुसारेण 'भ' वर्णेन 4 इति संख्या, 'य' वर्णेन 1 इति संख्या ज्ञायते। अनयोः स्थापनया 41 इति संख्या दृश्यते। ततः अंकानां वामतो गतिः इति नियमेन 14 भावस्य राशेर्वा संख्या भवति। सा तु भावसंख्या द्वादशेन तष्टितं 14÷12 लब्धिः 1, शेषश्च 2 इति प्राप्यते। अत्र शेषः 2 इयं संख्या राशेर्भावस्य वा बोधकसंख्या जाता तस्मात् कारणात् भाग्यशब्देन द्वितीयभावस्थानम् अत्र जानीयात्।

ततः **शूलशब्दे** सारिण्यनुसारेण 'श' वर्णेन 5 इति संख्या, 'ल' वर्णेन 3 इति संख्या ज्ञायते। अनयोः स्थापनया 53 इति संख्या दृश्यते। ततः अंकानां वामतो गतिः इति नियमेन 35 भावस्य राशेर्वा संख्या भवति। सा तु भावसंख्या द्वादशेन तष्टितं 35÷12 लब्धिः 2, शेषश्च 11 इति प्राप्यते। अत्र शेषः 11 इयं संख्या राशेर्भावस्य वा बोधकसंख्या जाता तस्मात् कारणात् शूलशब्देन एकादशभावस्थानम् अत्र भवेत्।

अनेन प्रकारेण **रिःफशब्दे** सारिण्यनुसारेण 'र' वर्णेन 2 इति संख्या, 'फ' वर्णेन 2 इति संख्या ज्ञायते। अनयोः स्थापनया 22 इति संख्या दृश्यते। ततः अंकानां वामतो गतिः इति नियमेनापि 22 एव भावस्य राशेर्वा संख्या भवति। सा तु भावसंख्या द्वादशेन तष्टितं 22÷12 लब्धिः 1, शेषश्च 10 इति प्राप्यते। अत्र शेषः 10 इयं संख्या राशेर्भावस्य वा बोधकसंख्या जाता तस्मात् कारणात् रिःफशब्देन दशमभावस्थानं भवति।

**नीचशब्दे** सारिण्यनुसारेण 'न' वर्णेन 0 इति संख्या, 'च' वर्णेन 6 इति संख्या ज्ञायते। अनयोः स्थापनया 06 इति संख्या दृश्यते। ततः अंकानां वामतो गतिः इति नियमेन 60 भावस्य राशेर्वा संख्या भवति। सा तु भावसंख्या द्वादशेन तष्टितं 60÷12 लब्धिः 5, शेषश्च 00 इति प्राप्यते। अत्र शेषः 00 इयं संख्या 12 संख्यां द्योतयति। अतः 12 राशेर्भावस्य वा बोधकसंख्या जाता तस्मात् कारणात् नीचशब्देन द्वादशभावस्थानम् अत्र भवेत्।

**कामशब्दे** सारिण्यनुसारेण 'क' वर्णेन 1 इति संख्या, 'म' वर्णेन 5 इति संख्या ज्ञायते। अनयोः स्थापनया 15 इति संख्या दृश्यते। ततः अंकानां वामतो गतिः इति नियमेन 51 भावस्य राशेर्वा संख्या भवति। सा तु भावसंख्या द्वादशेन तष्टितं 51÷12 लब्धिः 4, शेषश्च

3 इति प्राप्यते। अत्र शेषः 3 इयं संख्या राशेर्भावस्य वा बोधकसंख्या जाता, तस्मात् कारणात् कामशब्देन तृतीयभावस्थानं ज्ञेयमिति। अस्मिन् ग्रन्थे सर्वत्र भावराशीनामवबोधाय इयं संख्याग्रहणव्यवस्था एव स्वीकरणीया। यथा निर्दिशति जैमिनिः –

**सर्वत्र सवर्णा भावा राशयश्च।**

अर्थात् सर्वस्मिन् स्थाने भावाः राशयश्च एकादिसंख्यावबोधकाक्षरगम्याः। अत्र चकारात् भावा राशयश्च सवर्णा अर्थात् वर्णदेन राशिना सहिता (वर्णदराशिदशा) सहिता ग्राह्याः। सम्प्रति प्रयोजनाभावाद्वर्णदराशिदशा अत्र न दत्वा परिशिष्टे प्रदत्तास्ति। परन्तु उपर्युक्तसंख्यावबोधकव्यवस्था ग्रहज्ञाने न स्वीकरणीया।

**न ग्रहाः।**

अस्य सूत्रस्य आशयद्वयं वर्तते। प्रथमाशयस्तु यथा भावा राशयश्च संख्यावबोधकाक्षरगम्याः तथा ग्रहा न स्वीकरणीयाः। अपितु ग्रहाणां संज्ञया एव ते निर्दिष्टाः सन्ति। द्वितीयाशयस्तु यथा भावा राशयश्च सवर्णा वर्णदराशिसहितास्तथा ग्रहा न सन्ति। अर्थात् ग्रहाणां वर्णदराशयो न भवन्तीति।

**प्रथमार्गला तत्प्रतिबन्धकस्थानानि च–**

**''दारभाग्यशूलस्थार्गला निध्यातुः''**

निध्यातुः अर्थात् द्रष्टुग्रहाद् राशेर्वा दारभाग्यशूलस्था (द्वितीय–चतुर्थ–एकादशस्थानस्थिताः) ग्रहाः अर्गलाकारकाः भवन्तीति। अर्थात् विचाराश्रयिराशितः ग्रहाद् वा दारस्थानमर्थात् चतुर्थभावस्थानं, भाग्यस्थानमर्थात् द्वितीयभावस्थानं शूलस्थानमर्थाद् एकादशस्थानम् अर्गलाकारकं भवति, यदि तत्र ग्रहाः भवन्ति। तत्र अर्गलास्थाने स्थितो ग्रहो विचाराश्रयिस्थानस्य फलस्य अर्गलाशृंखलां बन्धनं करोतीत्यर्थः न तु द्रष्टुरिति। तद्भाव फलस्यैव निरोधं नियन्त्रितं विधास्यति।

ततः उपर्युक्तार्गलायाः बाधकस्थानानि एवमेव प्रतिपादयति जैमिनिः –

**रिष्फ–नीच–कामस्था विरोधिनः।**

अर्थात् द्रष्टुर्ग्रहात् राशितो वा रिष्फस्थानमर्थात् दशमस्थानं, नीचस्थानमर्थात् द्वादशस्थानं तथा च कामस्थानमर्थात् तृतीयस्थानं उपर्युक्तार्गलास्थानानां क्रमशः प्रतिबन्धकस्थानानि सन्ति। यदि एतेषु स्थानेषु ग्रहाः भवन्ति तदा अर्गलायोगस्य प्रतिबन्धं भवति।

कथयितुं शक्यते यद् यदि द्रष्टुग्रहाद् राशेर्वा चतुर्थस्थाने ग्रहाः सन्ति तदा तु अर्गलायोगो भवति किन्तु यदि द्रष्टुग्रहात् राशेर्वा दशमस्थाने ग्रहाः सन्ति तदा तु अर्गलाबाधकं भवति। एवमेव द्रष्टुग्रहात् राशेर्वा द्वितीयस्थाने ग्रहाः सन्ति तदा तु अर्गला परन्तु द्वादशे ग्रहाः भवन्ति तदा तस्याः बाधकयोगो भवति। अनेन प्रकारेण द्रष्टुग्रहात् राशेर्वा एकादशस्थाने ग्रहाः सन्ति तदा तु अर्गला किन्तु तृतीयस्थाने ग्रहाः स्युः तदा अर्गलाबाधकाः भवन्तीति।

अत्र समस्या उत्पद्यते यद् अर्गलाबाधकयोगः भविष्यति न वेत्यस्य निर्णये ग्रहाणां बलाबलं कथं चिन्तयेदिति। अस्मिन्सन्दर्भे अर्गलाबाधकस्याऽपवादं जैमिनिसूत्रे निर्दिशति मुनिः –

**न न्यूना विबलाश्च।**

अर्थाद् अर्गलास्थानस्थितग्रहापेक्षया बाधकस्थाने स्थितानां ग्रहाणां संख्या न्यूना अथवा तत्र ग्रहो बलहीनः स्थितः स्यात्तदा एतस्मिन् योगे अर्गलाबाधको न भवति। अर्थात् यदा बाधकस्थानस्थितग्रहाः अधिकाः भवेयुः, बलवन्तः स्युः तदैव अर्गलाबाधकाः भवन्ति नो चेन्न भवन्ति।

केन्द्रीयसंस्कृतविश्वविद्यालयः

यथा – अर्गलायोगकर्त्तारो ग्रहाः त्रयः सन्ति एवं चार्गलाबाधकयोग– कर्त्तारौ द्वौ ग्रहौ स्तः तदा अर्गलायोगस्य प्रतिबन्धं न भवति।

तत्र राश्यर्गलाविचारे राशिबलं विचारणीयं भवति। अस्मिन् सन्दर्भे वृद्धकारिकायां कथितमस्ति यत्–

एकलव्यपरिसरः अगरतला, त्रिपुरा।

**" अग्रहात् सग्रहो ज्यायान् सग्रहेष्वधिकग्रहः।**

**साम्ये चर–स्थिर– द्वन्द्वाः क्रमात् स्युर्बलशालिनः।।**

अर्थात् अग्रहराशितः सग्रहराशिः बलवान् भवति। तथा सग्रहभावात् अधिकग्रहयुक्तराशिः बली भवति। यदि उभयत्र ग्रहसंख्या तुल्या स्यात् तदा चरात् स्थिरराशिः, स्थिरात् द्विस्वभावराशिः बलयुक्तो भवति।

एवमेव तत्र ग्रहसाम्ये ग्रहबलसाम्ये वा ग्रहबलविचारः करणीयः। तत्तु नैसर्गिकबलविचारानुसारेण करणीयम्। यथा प्राप्यते जैमिनिसूत्रे ग्रहाणां नैसर्गिकबलाबलम्–

**मन्दो ज्यायान् ग्रहेषु।**

अर्थात् सप्तग्रहेषु मन्दः (शनिः) ज्यायानर्थात् वृद्धः बलहीनो वास्ति। अर्गलाप्रसंगेऽस्मिन् वृद्धकारिकायामपि एवमेव लिखितं वर्तते यत् –

**भय (2) पुण्य (11) विना (4) भावाद् द्रष्टुराहुः शुभार्गलम्।**
**स्फुट (12) गो (3) ज्ञेय (10) भावात्तु विपरीतार्गलं बिदुः।।**

अर्थात् प्रतिबन्धकस्थाने ग्रहसंख्या अधिका किं वा प्रबला भवेत् तदा विपरीतार्गला भवति। यदि शुभार्गले पापग्रहः शुभग्रहो वा तिष्ठेत् तेन द्रष्टा दृष्टं लग्नं प्राबल्याय भवति। यदि ग्रहः विपरीतार्गलस्थितः तं पश्यति तदा प्राबल्याय न भवति। यथोक्तमस्ति –

**यस्य पापः शुभो वापि ग्रह स्तिष्ठेच्छुभर्गले।**
**तेन द्रष्टेक्षितं लग्नं प्राबल्यायोपकल्प्यते।।**
**यदि पश्येद्ग्रहस्तन्न विपरीतार्गलस्थितः।।**

**(ख) द्वितीयार्गला तत्प्रतिबन्धकस्थानं च –**

**प्राग्वत् त्रिकोणे।**

त्रिकोणे पचंमनवमस्थानयोः प्राग्वत् पूर्वोक्तानुसारेण अर्गला तत्प्रतिबन्धकादिकं ज्ञेयम्। अर्थात् पचंमस्थाने ग्रहसत्वेऽर्गला भवति किन्तु नवमभावे तस्य प्रतिबन्धो ज्ञेयः। परन्तु बाधकस्य न्यूनत्वे, निर्बलत्वे च अर्गलायाः न प्रतिबन्धकत्वं भवतीति।

**(ख) तृतीयार्गला तत्प्रतिबन्धकस्थानं च –**

**विपरीतं केतोः।**

केतोः अर्गला तत्बाधकस्थानं च विलोमं जानीयादर्थात् सामान्यतः द्रष्टुग्रहात् पचंमस्थाने ग्रहे सति अर्गला भवति नवमस्थानेन प्रतिबाधकं, अतोऽत्र विपरीते सति यत्र केतुः स्थितः तस्मात् स्थानात् नवमस्थानस्थिताः ग्रहाः स्युः तदा अर्गला जायते किन्तु तस्मादेव पचंमस्थाने स्थिताः ग्रहाः तद्बाधकाः भवन्तीति। अत्र केतुशब्देन तात्पर्यं राहुः केतुः वेत्यस्ति। सीतारामझामहाभागाः अत्र विपरीतं केतोः इति सूत्रस्य तात्पर्यं रिष्फ(10)नीच(12)कामा(3) अर्गलास्थानानि तथा दार(4) भाग्य (2) शूलानि(11) तद्बाधकस्थानानीत्यप्यामनन्ति। परन्तु अच्युतानन्दझाप्रभृतिटीकाकाराः सूत्रस्य तात्पर्यमिदं न स्वीकुर्वन्तीति।

### 2.2.3 अप्रतिबन्धकार्गलाविचारः –

निराभासार्गला शुद्धार्गला वेति अर्गलायोगविषये तत्र भणितमस्ति –

**कामस्था तु भूयसा पापानाम्**

द्रष्टुग्रहस्य राशेर्वा कामस्था (तृतीयस्थानस्था) या अर्गला सा पापग्रहाणां बाहुल्येन भवति। अर्थात् विचाराश्रयिस्थानं यो ग्रहः पश्यति, तस्मात् दृष्टस्थानात् तृतीयस्था त्रयाणां पापानां तदधिकानां वा स्थितिवशात् पापार्गला भवति। इयं पापार्गला अप्रतिबन्धका भवति। ध्यातव्यं यत् द्रष्टुग्रहस्य राशेर्वा तृतीये द्वौ पापग्रहौ भवत अथवा एक एव पापग्रहः स्यात्तदा

अर्गलेयं न भवति। पापग्रहास्तु क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः,राहुकेतू चैते पापग्रहाः।

**अर्गला बोधक चक्रम्**

| **केतुवर्जितान्येषां ग्रहाणाम्** | |
|---|---|
| **अर्गलास्थानानि** | **बाधकस्थानानि** |
| 4 | 10 |
| 2 | 12 |
| 11 | 3 |
| 5 | 9 |
| 3 | — |
| **केतुराह्वोः** | |
| **अर्गलास्थानानि** | **बाधकस्थानानि** |
| 9 | 5 |

**प्रश्न–03. आत्मादि–सप्त–अष्टकारकाणां परिचयं सोदाहरणं प्रतिपादयत।**

**उत्तरम्–** ज्योतिषशास्त्रे फलकथनाय कारकविमर्शः महत्वपूर्णो वर्तते। अत्र कारकशब्देन तात्पर्यमस्ति यत् यः कार्यं कर्त्तुं समर्थोऽस्ति। ग्रहाणां मध्ये कः ग्रहः कीदृशं फलं दातुं सक्षमः इति ज्ञानाय कारकविचारः क्रियते। तत्र कारका अपि द्विविधाः– चरकारकाः स्थिरकारकाश्च। प्रत्येकं जनस्य कुण्डलीस्थग्रहाः तत्तज्जनस्य जन्मसमयाद्यनुसारेण राशिषु स्थिताः भवन्ति। अतः एकजनस्य कुण्डलीस्थाः ग्रहाः राश्यद्यनुसारेण अपरजनस्य कुण्डलीस्थग्रहेभ्यः भिन्नाः भवन्ति। अतः के ग्रहाः तत्र कारकाः फलप्रदायकाः वा भविष्यन्तीति निर्णयार्थं चरकारकाः विचार्यते। एवमेव फलकथनाय स्थिरकारकरूपेऽपि ग्रहाः स्वीकृताः सन्ति। तत्र सर्वप्रथमं फलकथनविशेषप्रतिपादनार्थं चरकारकान् प्रतिपादयति जैमिनिः –

**1. आत्मकारकः – आत्माधिकः कलादिभिर्नभोगः सप्तानामष्टानां वा।**

अर्थात् सूर्यादिशनिपर्यन्तानां सप्तानां वा (मतान्तरेण) सूर्यादिराह्वन्ताष्टानां मध्ये यो ग्रहः कलादिभिरधिको भवेत् सः आत्मकारको भवति, अत्र कलादिशब्देनांऽशस्य ग्रहणं कर्तव्यमिति चेत्तदा रव्यादिसप्तानां मध्ये योंऽशाधिकः स एवात्मा आत्मकारको भवति। यदा ग्रहाणां अंशाः समाः भवन्ति तदा यस्य कलामानम् अधिकं भवेत् सः आत्मकारकः ज्ञेयः। तथा यदि अंशाः कलाश्च समाः भवन्ति तदा यस्य विकला अधिका स्यात् तम् आत्मकारकं जानीयात्। यदा अंश–कला–विकलानां च साम्यं भवति तदा सर्वेषु ग्रहेषु यत् सर्वाधिकबलशाली भवति सः ग्रह आत्मकारको भवति। एवमेव वृद्धकारिका–

**भागाधिके कारकः स्यादल्पभागोऽन्त्यकारकः।**
**मध्यांशो मध्यखेटः स्यादुपखेटः स एव हि।।**

अनेन प्रकारेण रवितः शनिपर्यन्तं सप्तकारकाः भवन्ति। मतान्तरेण सूर्यतः राह्वन्तपर्यन्तं अष्टकारकाः भवन्ति। अत्रावधेयं यत् राहुकेत्वोः अंशादिसाम्यत्वादनयोर्मध्ये यः बली स कारको भवति। अपि च विलोमगतित्वात् अनयोर्मध्ये यः कारकः तस्य अंशादिमानं त्रिंशद्भ्यः ऊनिते सति यन्मानं समागच्छति तस्यानुसारेण कारकत्वं चिन्तनीयम्। परन्तु जैमिनिसूत्रस्य व्याख्यायां इयं व्यवस्था न दृश्यते।

उपर्युक्तपाराशरवचनानुसारेण सर्वकारकेषु आत्मकारकस्य प्राधान्यं दरीदृश्यते। सः सर्वविधफलं दातुं शक्यते। ततः आत्मकारकस्योत्कृष्टताविषये कथयति जैमिनिः–

**स इष्टे बन्धमोक्षयोः।**

अर्थात् सः आत्मकारकः, बन्धमोक्षयोः दुःखसुखयोः, इष्टे स्वामी भवति। यथा तस्मिन् आत्मकारके इष्टे स्वोच्च–स्वस्थान–शुभस्थान–शुभमित्रदृष्टे सर्वात्मनि बलिष्ठे मोक्षस्य उत वा संसारेस्मिन् सुख–दुःख–स्त्री–पुत्र–रोगादितः मुक्तिकारको भवति। तथा यदि नीचस्थाने शत्रुराशौ निर्बलः अस्तंगतो वा भवेत्तदा बन्धनस्य अर्थात् संसारे रूपजन्ममृत्युलोकागमनप्रभृतिनरकस्य कारणं भवति। एवमेव कथयितु शक्यते यदिष्टे सति संसारे सुख–सौभाग्य– सम्मान विद्या–ऐश्वर्यादिप्रदायकं चतुःवर्गप्रदायकं (धर्म–अर्थ–काम–मोक्षप्राप्तिकारकः) च भवति। स एव निर्बले नीचे वा सति दारिद्रयादिनेकानेककष्टकारको भवति। अर्थात् आत्मकारक ग्रह एव सर्वैश्वर्यस्य सर्वातिदुःखस्य च कारको भवति। निष्कर्षरूपे आत्मकारको ग्रहः प्रतिकूलकः स्यात्तदा पापकर्मप्रवृत्तिद्वारा संसाररूपबन्धनप्रदायकः स्यात्, यदि अनुकूलस्तदा ज्ञान–धर्माचरणादिभिर्मोक्षकर्ता भवेदिति। अत्रावधेयं यत्फलमिदं तस्य दशान्तर्दशादिषु लभ्यते। ततः क्रमशः अन्यकारकाः जैमिनिमते –

**2.अमात्यकारकः– तस्यानुरणादमात्यः।**

अर्थात् तस्य आत्मकारकस्य अनुशरणात् अनुपश्चात् शरणात् गमनात् अमात्यकारको भवति। अस्य सूत्रस्य तात्पर्यमस्ति यद् आत्मकारकापेक्षया न्यूनांशकतया पश्चादवस्थानाद् ग्रहः अमात्यकारको भवति। यस्यां कुण्डल्याम् अमात्यकारकग्रहः स्वोच्चस्थः, स्वगृहस्थः, बलिष्ठो वा स्यात्, स राजादिभिः श्रेष्ठजनैः सुखं प्राप्नोति तथा च यदि अमात्यकारकग्रहः स्वनीचस्थः शत्रुगृहस्थः अस्तंगतः निर्बलो वा स्यात् तदा जातकः राजादिभिः दुःखं प्राप्नोति।

**3. भ्रातृकारकः – तस्य भ्राता।**

अर्थात्तस्य अमात्यकारकग्रहस्य अनुपश्चादल्पांशतया ग्रहः भ्रातृकारकः स्यादिति। भ्रातृकारकग्रहेण भ्रातृसम्बन्धिसुख–दुःखादिकं विचारणीयम् ।

**4. मातृकारकः – तस्य माता।**

अर्थात्तस्य भ्रातृकारकस्य अल्पांशकतयाऽनुसरणात् मातृकारकः भवति। एतेन मातृसम्बन्धिसुख–दुःखदिकस्य चिन्ता करणीया।

**5. पितृकारकः – तस्य पिता।**

अर्थात्तस्य मातृकारकस्क अल्पांशकतया ग्रहः पितृकारको भवति। एतस्मात् ग्रहात् पितृसम्बन्धिसुख–दुःखादिकस्य विवेचना करणीया।

**6. पुत्रकारकः – तस्य पुत्र।**

अर्थात्तस्य पितृकारकस्य अल्पांशकतयानुशरणात् ग्रहः पुत्रकारकः स्यात्। पुत्रकारकग्रहात् पुत्रसुखस्य फलकथनं करणीयम्।

**7. ज्ञातिकारकः – तस्य ज्ञातिः।**

अर्थात्तस्य पुत्रकारकस्य अल्पांशकतयाऽनुशरणात् ग्रहः ज्ञातिकारको भवति। अस्मात् ज्ञातिसम्बन्धिसुखदुःखादीनां विचारः करणीयः।

**8. दाराकारकः – तस्य दाराश्च।**

अर्थात्तस्य ज्ञातिकारकस्य न्यूनांशकलादिग्रहः दारा (स्त्री) कारको भवति। अनेन स्त्रीविषयकसुखदुःखादिकं ज्ञेयम्। अत्र तु अष्टकारकाः विचारिताः। यदि सप्तकारकाः विचारणीयाः भवन्ति तदा कस्य कारकस्य लोपः करणीयः इति विषये पुत्रकारकस्य विकल्पं कथयति जैमिनिः –

**मात्रा सह पुत्रमेके समामनन्ति।**

अत्र प्रकृतोदाहरणेन सप्तकारकाः अष्टकारकाश्च सारिणीद्वारा प्रदर्श्यते–

**–सप्तकारकचक्रम्–**

| **कारकः** | आत्मा | अमात्यः | भ्राता |
|---|---|---|---|
| माता | पिता | ज्ञातिः | दारः |

**–अष्टकारकचक्रम्–**

| **कारकः** | आत्मा | अमात्यः | भ्राता | माता |
|---|---|---|---|---|
| **कारकः** | पिता | पुत्रः | ज्ञातिः | दारः |

**प्रश्न–04. आत्मकारकनवांशमवलम्ब्य ग्रहाणा ंफलविचारः–**

**उत्तरम्–** यो ग्रहः अंशादिभिः सर्वेषु अधिको भवति स आत्मकारको भवति। तत्र ग्रहाणां नवमांशकुण्डलीं विधाय आत्मकारकग्रह यस्मिन्नाशौ भवति तं राशिमाधारीकृत्य फलकथनविधिः अत्र निर्दिष्टः। अस्मिन् विषये जैमिनिः कथयति यत्–

**अथ स्वांशो ग्रहाणाम्।**

अथ अनन्तरं, स्वांश आत्मकारकाश्रितांशः अर्थात् स्वस्य आत्मकारकग्रहस्य यो नवांशः तस्मात् सूर्यादिग्रहाणां फलकथनं करणीयम्। कथयितुं शक्यते यद् आत्मकारकग्रहस्य नवांशं प्रसाध्य तस्मात् सूर्यादिग्रहाणां, राशीनां च संस्थितिवशात् फलं विचारणीयं भवति। ततः सर्वप्रथमं आत्मकारकग्रहस्य नवांशाश्रित– मेषादिराशिफलं विचार्यते–

**1. मेषराशिफलम्– पंच मूषिकमार्जारा।**

अत्र कटपयादिसंख्याबोधकचक्रानुसारेण पंच अर्थात् प=1 च=6,अंकानां वामतो गति इति नियमेन जाता संख्या 61,ततः 61३12 लब्धि 5,शेष=1 अत्र शेषेण प्रयोजनत्वात् 1=मेषराशिः अतः आत्मकारकग्रह यदि मेषराशेः नवमांशे स्थितः स्यात् तदा मूषकमार्जाराः अर्थात् मूषकाःविडालाश्च दुःखदायकाः भवन्ति। अत्र सीतारामझामहाभागानुसारेण आत्मकारकनवांशराशिफलकथने मुनिना ये पंचादयः राशिबोधकशब्दाः प्रयुक्ताः तेषां कथनस्योद्देश्यं तु फलप्राप्तिविषयकसंख्यायाः द्योतकमपि अस्ति। यथा "पंचमूषिक मार्जाराः" इति सूत्रे मूषिकमार्जाराणां संख्या द्योतनाय अपि "पंच" शब्दः अर्थात् जातकस्य गृहे 5(पंच)मार्जाराः,61(पंच) मूषिकाश्च उपद्रवकारकाः भविष्यन्ति। एवमेव अग्रेऽपि संख्या ज्ञेया। अत्र 61 वर्षे मूषिकमार्जाराणां भयं सम्भाव्यते इत्यपि वक्तुं शक्यते।

**2. वृषराशिफलम्– तत्र चतुष्पादः।**

आत्मकारकग्रहस्य नवमांश यदा तत्र अर्थात् त्=6,र=2 अंकानां वामतो गति इति नियमानुसारेण जाता संख्या=26,ततः द्वादशभिर्भक्ते शेषः 2=वृष अतः वृषराशौ स्थितः तदा चतुष्पादाः वृषादयः सुखदायकाः भवन्ति। तत्र 26 संख्यात्मकं पशुधनं सम्भाव्यते।

**3. मिथुनराशिफलम्– मृत्यौ कण्डूःस्थौल्यं च।**

मृत्यौ=कटपयादिना म=5 य=1 अंकानां वामतो गति इति रीत्यानुसारेण 15, ततः द्वादशभिर्भक्ते शेषः=3 अर्थात् मिथुनः राशेः नवांशे आत्मकारकग्रहो भवेत् तदा कण्डुरोगः शरीरे स्थौल्यं च भवति। कण्डुरोगः स्थौल्यं च पंचदश वर्षे सम्भवति।

**4. कर्कराशिफलम्– दूरे जलकुष्ठादि।**

दूरे कटपयादिना,द=8 र=2 अंकानां वामतो गतिः इत्यनेन=28 ततः द्वादशभिर्भक्ते शेषः 4 अर्थात् कर्कराशिः नवांशेः आत्मकारके ग्रहे सति जलात् कष्टं,जलोदररोगादयः एवं च कुष्ठनामकक्षुद्ररोगभयं सम्भवति। अर्थात् शरीरे नानाविधरोगाः भवन्ति। रोगसमाप्तिकालः 28 वर्षे सम्भवति।

**5. सिंहराशिफलम्– शेषाः श्वापदानि।**

शेषाः इत्यनेन कटपयादिविधिना श=5 ष=6=अंकानां वामतो गतिः इति रीत्या 65 ततः द्वादशभिर्भक्ते शेषः=5 अर्थात् सिंहांशे आत्मकारके सति श्वापदानि=शुनकादिभ्यः भयं भवति। तत्र कुक्कुरादिहिंसपशुभ्यः 65 वर्षे महद्भयं सम्भवति।

**6. कन्याराशिफलम्– मृत्युवज्जायाऽग्निकणश्च।**

जाया=कटपयादिचक्रानुसारेण ज=8 य=1 अंकानां वामतो गतिः इति नियमेन 18 द्वादशभिर्भक्ते शेषः=6 अर्थात् कन्याराशिः आत्मकारकनवांशे स्यात्तदा मिथुनराशिवत् शरीरे कण्डुः,रक्तविकारः,अग्निकणश्च भयप्रदो भवति। तत्र फलमिदं अष्टादश वर्षे सम्भवति।

**7. तुलाराशिफलम्– लाभे वाणिज्यम्।**

लाभे कटपयादिरीत्यानुसारेण ल=3 भ=4 ततः अंकानां वामतो गतिः इति रीत्यनुसारेण =43 द्वादशभिर्भक्ते÷शेषः=7 अर्थात् आत्मकारकग्रहस्यनवांशे तुलाराशिः स्यात्तदा जातकः प्रायः 43 वर्षे वाणिज्येन अधिकं लाभं प्राप्स्यति।

**8. वृश्चिकराशिफलम्– अत्र जलसरीसृपाः स्तन्यहानिः।**

अत्र कटपयादिवर्गानुसारेण अ=0 र=2 अंकानां वामतो गतिः इति नियमेन 20ततः द्वादशभिर्भक्ते शेषः=8 अर्थात् वृश्चिकः आत्मकारकग्रहस्यनवांशे स्यात्तदा जलात् सर्पादिसरीसृपेभ्यो भयं, मातृदुग्धहानिः,मातृहानिः वा भवति। फलमिदं 20 वर्षे सम्भवति।

**9. धनुराशिफलम्– समे वाहनादुच्चाच्च क्रमात्पतनम्।**

समे इत्यत्र कटपयादिविध्यनुसारेण स=7 म=5 अंकानां वामतो गत्यनुसारेण 57 ततः द्वादशभिर्भक्ते शेषः=9 अर्थात् धनुःराशिः आत्मकारकनवांशे भवति तदा वाहनात् अश्वादेःमोटरयानाद्वा उच्चस्थानात् उच्चपदाद्वा क्रमात् किंचिद्वस्तुसंलग्नपूर्वकं पतनं कार्यक्षेत्रे सम्मानस्य च हानिः सम्भवति। अत्र समस्थाने वाहनात् उच्चस्थानाच्च क्रमशः पतनं 57 वर्षे सम्भाव्यते।

**10. मकरराशिफलम्– जलचरखेचरकण्डुर्दुष्टग्रन्थयश्च रिष्फे।**

रिष्फे इत्युक्ते र=2 फ=2 कटपयादिवर्गानुसारेण 22 द्वादशभिर्भक्ते शेषः10 अर्थात् मकरांशे यदा आत्मकारकग्रहः तिष्ठति तदा जलचराः अर्थात् मकरादिजलजन्तवः,खेचराः अर्थात् गरुडादिपक्षिणः खेटाः अर्थात् ग्रहाः कष्टदायकाः भवन्ति। अपि च कण्डूगण्डादिकरोगाश्च भवन्ति। फलमिदं 22 वर्षे सम्भाव्यते।

**11. कुम्भराशिफलम्– तडागादयो धर्मे।**

धर्मे इत्यत्र कटपयादिरीत्यनुसारेण ध=9 म=5,अंकानां वामतो गतिः इत्यनुसारेण 59 द्वादशभिर्भक्ते शेषः 11 अर्थात् कुम्भांशे यदा आत्मकारकग्रहो भवति तदा जातकः धर्मानुरागी,यज्ञानुष्ठानांच सम्पादयति। तडागकूपादि जलाशयानां निर्माणमपि करोति। अर्थात् जातकस्य अभिरुचिः धार्मिककृत्येषु भवति। प्रायः 59 तमे वर्षे जातकः तडागादिसम्पादको भवति।

**12. मीनराशिफलम्– उच्चे धर्मनित्यता कैवल्यं च।**

उच्चे इत्यत्र कटपयादिवर्गानुसारेण उ=0 च=6 अंकानां वामतो गतिः इत्यनुसारेण 60 ततः द्वादशभिर्भक्ते शेषः 0 अथवा 12 अर्थात् मीनांशे आत्मकारको भवति तदा जातकः नित्यं धार्मिककार्येषु संलग्नो भवति। तथा च कैवल्यं अर्थात् मोक्षं प्राप्नोति। प्रायः 60 तमे वर्षे जातकस्य मोक्षः सम्भवति।

डॉ.ब्रह्मानन्दमिश्रः

**प्रश्न–05. दीर्घायु–मध्यमायु–अल्पायुर्विचारं सोदाहरणं विशदयत।**

**उत्तरम्–** जैमिनिसूत्रग्रन्थे आयुर्निर्णयाय बहवः विधयः प्रतिपादिताः सन्ति। अत्र सर्वप्रथमं आयुर्विचारस्थानविषये कथितमस्ति –

**आयुः पितृदिनेशाभ्याम्।।**

पितृदिनेशाभ्यामित्यत्र कटपयादिवर्गानुसारेण **पितृ**शब्दाल्लग्नं तथा **दिन**शब्दात् अष्टमभावः अवगम्यते, अनयोः ईशाभ्यां राशीश्वराभ्यामर्थात् लग्नेश–अष्टमेशाभ्याम् आयुर्दायः विचार्यः। अर्थात् लग्नस्थराशेः योऽधिपः एवं च तस्माद् अष्टमभावस्थराशेः योऽधिपः, तयोरायुर्विचारः करणीयः, यथा– प्रकृतकुण्डल्यां लग्नभावे सिंहराशिः, तस्याधिपः सूर्यः। तस्मादष्टमभावे मीनराशिः। तस्याधिपः गुरुः।

यथा पितृदिनेशाभ्यामर्थात् लग्नेशाष्टमेशाभ्यामायुर्दायः विचारणीयो भवति तथैव अन्यप्रकारेणापि विचारणीयः। यथोक्तं जैमिनिसूत्रे

**एवं मन्दचन्द्राभ्याम्।।**

**पितृकालतश्च ।।**

एवमर्थाद्यथा पूर्वं लग्नेशाष्टमेशाभ्याम् आयुर्विचारः कृतः तथैव मन्दचन्द्राभ्यामर्थात् शनिचन्द्राभ्याम् अथवा कटपयादिवर्गानुसारेण "मन्द" शब्दात् 58, ततः अंकानां वामतो गतिरित्यनेन 85 सङ्ख्या जाता, द्वादशभिः विभक्ते शेषः 1 अर्थात् लग्नमित्यपि ज्ञायते अतः लग्नचन्द्राभ्यामपि विचारः कार्यः। एवमेव पितृकालतः अर्थात् जन्मलग्नहोरालग्नाभ्याम् चापि पूर्वोक्तरीत्यैव आयुर्विचारः कार्यः।

अत्र तात्पर्यमिदं यद् यथा लग्नेशाद् अष्टमेशाच्च आयुर्विचारः भवति तथैव शनिचन्द्राभ्याम् अथवा लग्नचन्द्राभ्यामपि आयुर्विचारः करणीयः। अत्र "मन्द" शब्दात् केचन जनाः केवलं "शनि" इत्यर्थं स्वीकुर्वन्ति। केचन च केवलं लग्नम् इति आमनन्ति। वस्तुतः परिस्थितिवशात् कदाचित् लग्नचन्द्राभ्यां कदाचिच्च शनिचन्द्राभ्यां विचारः करणीयः। अस्मिन् विषये जैमिनिसूत्रग्रन्थस्य द्वितीयाध्यायस्य प्रथमपादस्य नवमसूत्रं प्रमाणम्। यथा –

**पितृलाभगे चन्द्रे चन्द्रमन्दाभ्याम्।।**

चन्द्रे पितृलाभगे अर्थाल्लग्नगे सप्तमगे वा, चन्द्रलग्नाभ्याम् आयुर्विचारः भवति अन्यथा शनिचन्द्राभ्याम् आयुर्विचार्यम्। अस्याशयः यद् यदि लग्ने सप्तमे वा चन्द्रः स्थितः स्यात्तदा चन्द्रलग्नाभ्याम् आयुर्विचार्यम्। यदि लग्ने सप्तमे वा चन्द्रः न स्यादपितु अन्यभावेषु संस्थितः स्यात्तदा शनिचन्द्राभ्याम् आयुर्विचार्यम्। इति बहुसम्मतं सूत्रस्यार्थः। अत्र वृद्धकारिकायाम् –

**तथैव तनुचन्द्राभ्यामायुर्योगं विचिन्तयेत्।**
**जन्मेन्दौ वा स्थिते द्यूने चान्यस्थे मन्दचन्द्रयोः।।**

वस्तुतः जैमिनिसूत्रग्रन्थस्तु सूत्ररूपे वर्तते। अतः सूत्रस्यार्थे विभिन्नमतानि जायन्ते। अन्यग्रन्थेष्वपि परस्परम् एकमतं नास्ति। जैमिनिसूत्रस्य विभिन्नव्याख्याकाराः अस्य सूत्रस्यापि नैकविधार्थान् कुर्वन्ति। अतः बहुसम्मतं पूर्वोक्तमर्थ एव स्वीकरणीयः।

अनेन प्रकारेणैव यथा लग्नेश–अष्टमेशाभ्यां, मन्दचन्द्राभ्यां च आयुर्विचारो भवति। तथैव जन्मलग्न–होरालग्नाभ्यामपि विचारः कार्यः। ततः कथं विचारः कार्यः इति जिज्ञासायाः समाधाने जैमिनिमुनिः दीर्घाद्यायुर्योगान् कथयति।

**प्रथमयोरुत्तरयोर्वा दीर्घम् ।।**

**प्रथमद्वितीययोरन्त्ययोर्वा मध्यम् ।।**

**मध्ययोराद्यन्तयोर्वा हीनम्।।**

प्रथमयोः अर्थाच्चरयोः मध्ये स्थितयोः लग्नेशाष्टमेशयोः अथवा उत्तरयोः अर्थात् स्थिरद्विस्वभावर्योमध्ये स्थितयोः लग्नेशाष्टमेशयोः दीर्घायुर्योगः स्यात्। तथा च प्रथमद्वितीययोः अर्थात् चरस्थिरयोः राश्योर्मध्ये स्थितयोः लग्नेशाष्टमेशयोः अथवा अन्त्ययोः अर्थात् द्विस्वभावस्थयोः लग्नेशाष्टमेशयोः मध्यायुः ज्ञेयम्। एवमेव मध्ययोः अर्थात् स्थिरराश्योः मध्ये स्थितयोः लग्नेशाष्टमेशयोः अथवा आद्यन्तयोः चरद्विस्वभावस्थयोः लग्नेशाष्टमेशयोः, हीनायुः अल्पायुर्योगो वा स्यात्।

अत्र प्रकारत्रयेण (लग्नेशाष्टमेशयोः प्रकारेण, मन्दचन्द्रयोः संस्थितिवशाद् एवं जन्मलग्नहोरालग्नयोः प्रकारेण च) दीर्घाद्यायुर्योगाः स्पष्टीक्रियते –

**दीर्घायुर्योगः** – यदि लग्नेशाष्टमेशौ चरराश्योः मध्ये संस्थितौ तदा दीर्घायुर्योगः। एवमेव मन्दचन्द्रौ चरराश्योः मध्ये संस्थितौ तदा दीर्घायुर्योगः। तथैव जन्मलग्नहोरालग्ने चरराश्योः मध्ये संस्थिते भवतः तदा दीर्घायुर्योगः।

अनेन प्रकारेण लग्नेशाष्टमेशौ स्थिरद्विस्वभावयोर्मध्ये संस्थितौ तदाऽपि दीर्घायुर्योगः। एवमेव मन्दचन्द्रौ स्थिरद्विस्वभावयोर्मध्ये संस्थितौ तदा दीर्घायुर्योगः। तथैव जन्मलग्नहोरालग्ने स्थिरद्विस्वभावयोर्मध्ये संस्थिते तदाऽपि दीर्घायुर्योगः।

**मध्यमायुर्योगः** – यदि लग्नेशाष्टमेशौ चरस्थिरयोर्मध्ये संस्थितौ भवतः तदा मध्यायुर्योगः। एवमेव मन्दचन्द्रौ चरस्थिरयोर्मध्ये संस्थितौ तदा मध्यमायुर्योगः। तथैव जन्मलग्नहोरालग्ने चरस्थिरयोर्मध्ये संस्थिते स्तः तदा मध्यायुर्योगः।

अनेन प्रकारेण लग्नेशाष्टमेशौ द्विस्वभावराश्योर्मध्ये संस्थितौ तदा मध्यमायुः, एवमेव मन्दचन्द्रौ द्विस्वभावस्थयोः संस्थितौ भवतः तदापि मध्यमायुः, तथैव जन्मलग्नहोरालग्ने द्विस्वभावराश्योर्मध्ये संस्थिते भवतः तदापि मध्यायुः जानीयात्।

**अल्पायुर्योगाः** – लग्नेशाष्टमेशौ स्थिरराश्योर्मध्ये संस्थितौ भवतः तदा अल्पायुर्योगः। एवमेव मन्दचन्द्रौ स्थिरराश्योर्मध्ये संस्थितौ भवतः तदा अल्पायुः, तथैव जन्मलग्नहोरालग्ने स्थिरयोर्मध्ये संस्थिते तदाऽपि अल्पायुः स्यात्। तथैव लग्नेशाष्टमेशौ चरद्विस्वभावराश्योर्मध्ये संस्थितौ तदा अल्पायुर्योगः। एवमेव मन्दचन्द्रौ चरद्विस्वभावयोर्मध्ये संस्थितौ भवतः तदा अल्पायुर्योगः जायते।